## फणां च सप्तानाम्। (१२५/२३५४)

फणादीनां सप्तानां [1]धातूनाम् अवर्णस्य स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतः थलि च सेटि। फेणतुः। फेणुः। फेणिथ। पफणतुः। पफणुः। पफणिथ। रेजतुः। रेजुः। रेजिथ। रराजतुः। रराजुः। रराजिथ। भ्रेजे, भ्रेजाते, भ्रेजिरे। बभ्राजे, बभ्राजाते, बभ्राजिरे। भ्रेशे, भ्रेशाते, भ्रेशिरे। बभ्राशे, बभ्राशाते, बभ्राशिरे। भ्लेशे, भ्लेशाते, भ्लेशिरे। बभ्लाशे, बभ्लाशाते, बभ्लाशिरे। स्येमतुः। स्येमुः। स्येमिथ। सस्यमतुः। सस्यमुः। सस्यमिथ। स्वेनतुः। स्वेनुः। स्वेनिथ। सस्वनतुः। सस्वनुः। सस्वनिथ। सप्तानाम् इति किम्। दध्वनतुः। दध्वनुः। दध्वनिथ॥

## न शसददवादिगुणानाम्। (१२६/२२६३)

शस दद इत्येतयोः वकारादीनां च धातूनां गुण इत्येवमभिनिर्वृत्तस्य च योऽकारः तस्य स्थाने [2]एकारादेशो न भवति, अभ्यासलोपश्च। विशशसतुः। विशशसुः। विशशसिथ। ददे, ददाते, ददिरे। वादीनाम् – ववमतुः। ववमुः। ववमिथ। गुणस्य – विशशरतुः। विशशरुः। विशशरिथ[3]। लुलविथ। [4]पुपविथ। गुणशब्दाभिनिर्वृत्तस्य अर्शब्दस्य ओकारस्य चायमकारः इति एत्वं प्रतिषिध्यते॥

## अर्वणस्त्रसावनञः। (१२७/३६४)

अर्वन् इत्येतस्य अङ्गस्य तृ इत्ययमादेशो भवति, [5]सुश्चेत् ततः परो न भवति, स च नञ उत्तरो न भवति। अर्वन्तौ। अर्वन्तः। अर्वन्तम्, अर्वन्तौ, अर्वतः। अर्वता, अर्वद्भ्याम्, अर्वद्भिः। [6]अर्वती। आर्वतम्। असौ इति किम्? अर्वा। अनञः इति किम्? अनर्वाणौ। अनर्वाणः। 'अनर्वाणं वृषभं मन्द्रजिह्वम्' (ऋ. १.१९०.१)॥

## मघवा बहुलम्। (१२८/३६०)

मघवन् इत्येतस्य अङ्गस्य बहुलं तृ इत्ययमादेशो भवति। मघवान्, मघवन्तौ, मघवन्तः। मघवन्तम्, मघवन्तौ, मघवतः। मघवता[7]। मघवती। माघवतम्। न [8]च भवति। मघवा, मघवानौ, मघवानः। मघवानम्, मघवानौ, मघोनः। मघोना, मघवभ्याम्, मघवभिः[9]। मघोनी (ऋ. १.४८.८)। [10]माघवनम्॥

## भस्य। (१२९/२३३)

भस्य इत्ययमधिकारः आ अध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः भस्य इत्येवं तद्वेदितव्यम्। वक्ष्यति – 'पादः पत्' (६.४.१३०/४१४)[11]। [12]द्विपदः पश्य। द्विपदा कृतम्। भस्य इति किम्? द्विपादौ। द्विपादः॥

---

1. धातूनाम् नास्ति फ. ह. 2. एत्वं प्रतिषिध्यते फ. 3. विववरतुः विववरुः विवरिथ इत्यधिकम् ह. ड. 4. नास्ति फ.ह. 5. असौ परतः, सुशब्दः फ. 6. इति यावत् अर्वत्सु इत्यधिकम् ह. 7. मघवद्भ्याम् मघवद्भिः इत्यधिकम् क. ड. 8. च नास्ति फ. क. 9. इति इत्यधिकम् फ. 10. माघवनं हविः फ. ह. 11. इति इत्यधिकम् फ. 12. उदाहरणमिदं नास्ति क.